श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रिपञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रिपञ्चाशं दशकम् ॥

## धेनुकासुरवधवर्णनम्

अतीत्य बाल्यं जगतां पते त्व -
    मुपेत्य पौगण्डवयो मनोज्ञम्।
उपेक्ष्य वत्सावनमुत्सवेन
    प्रावर्तथा गोगणपालनायाम् ॥ 53.1 ॥

उपक्रमस्यानुगुणैव सेयं
    मरुत्पुराधीश तव प्रवृत्तिः।
गोत्रापरित्राणकृतेऽवतीर्ण -
    स्तदेव देवाऽऽरभथास्तदा यत् ॥ 53.2 ॥

कदापि रामेण समं वनान्ते
    वनश्रियं वीक्ष्य चरन् सुखेन।
श्रीदामनाम्नः स्वसखस्य वाचा
    मोदादगा धेनुककाननं त्वम् ॥ 53.3 ॥

उत्तालतालीनिवहे त्वदुक्त्या
    बलेन धूतेऽथ बलेन दोर्भ्याम्।
मृदुः खरश्चाभ्यपतत्पुरस्तात्
    फलोत्करो धेनुकदानवोऽपि ॥ 53.4 ॥

समुद्यतो धैनुकपालनेऽहं
    कथं वधं धैनुकमद्य कुर्वे।

इतीव मत्वा ध्रुवमग्रजेन
    सुरौघयोद्धारमजीघनस्त्वम् ॥ **53.5** ॥

तदीयभृत्यानपि जम्बुकत्वे -
    नोपागतानग्रजसंयुतस्त्वम् ।
जम्बूफलानीव तदा निरास्थ -
    स्तालेषु खेलन् भगवन् निरास्थः ॥ **53.6** ॥

विनिघ्नति त्वय्यथ जम्बुकौघं
    सनामकत्वाद्वरुणस्तदानीम् ।
भयाकुलो जम्बुकनामधेयं
    श्रुतिप्रसिद्धं व्यधितेति मन्ये ॥ **53.7** ॥

तवावतारस्य फलं मुरारे
    सञ्जातमद्येति सुरैर्नुतस्त्वम् ।
सत्यं फलं जातमिहेति हासी
    बालैः समं तालफलान्यभुङ्क्थाः ॥ **53.8** ॥

मधुद्रवस्रुन्ति बृहन्ति तानि
    फलानि मेदोभरभृन्ति भुक्त्वा ।
तृप्तैश्च दृप्तैर्भवनं फलौघं
    वहद्भिरागाः खलु बालकैस्त्वम् ॥ **53.9** ॥

हतो हतो धेनुक इत्युपेत्य
    फलान्यदद्भिर्मधुराणि लोकैः ।
जयेति जीवेति नुतो विभो त्वं
    मरुत्पुराधीश्वर पाहि रोगात् ॥ **53.10** ॥

॥ इति श्रीमन्नारायणीये त्रिपञ्चाशं दशकं समाप्तम् ॥